S.V.D.V Vyakaram (285)

**Set No. 1** Question Booklet No. 00068

# 15P/250/30

*(To be filled up by the candidate by blue/black ball-point pen)*

Roll No. | | | | | | | | | |

Roll No. (Write the digits in words) ..........................................

Serial No. of OMR Answer Sheet ..........................................

Day and Date .......................................... ( Signature of Invigilator )

## INSTRUCTIONS TO CANDIDATES

(Use only ***blue/black ball-point pen*** in the space above and on both sides of the **Answer Sheet**)

1. Within 10 minutes of the issue of the Question Booklet, check the Question Booklet to ensure that it contains all the pages in correct sequence and that no page/question is missing. In case of faulty Question Booklet bring it to the notice of the Superintendent/Invigilators immediately to obtain a fresh Question Booklet.
2. Do not bring any loose paper, written or blank, inside the Examination Hall ***except the Admit Card without its envelope.***
3. ***A separate Answer Sheet is given. It should not be folded or mutilated. A second Answer Sheet shall not be provided. Only the Answer Sheet will be evaluated.***
4. Write your Roll Number and Serial Number of the Answer Sheet by pen in the space provided above.
5. ***On the front page of the Answer Sheet, write by pen your Roll Number in the space provided at the top and by darkening the circles at the bottom. Also, wherever applicable, write the Question Booklet Number and the Set Number in appropriate places.***
6. ***No overwriting is allowed in the entries of Roll No., Question Booklet no. and Set no. (if any) on OMR sheet and Roll No. and OMR sheet no. on the Question Booklet.***
7. ***Any change in the aforesaid entries is to be verified by the invigilator, otherwise it will be taken as unfairmeans.***
8. ***Each question in this Booklet is followed by four alternative answers. For each question, you are to record the correct option on the Answer Sheet by darkening the appropriate circle in the corresponding row of the Answer Sheet, by pen as mentioned in the guidelines given on the first page of the Answer Sheet.***
9. For each question, darken only one circle on the Answer Sheet. If you darken more than one circle or darken a circle partially, the answer will be treated as incorrect.
10. *Note that the answer once filled in ink cannot be changed. If you do not wish to attempt a question, leave all the circles in the corresponding row blank (such question will be awarded zero marks).*
11. For rough work, use the inner back page of the title cover and the blank page at the end of this Booklet.
12. Deposit only **OMR** *Answer Sheet* at the end of the Test.
13. You are not permitted to leave the Examination Hall until the end of the Test.
14. If a candidate attempts to use any form of unfair means, he/she shall be liable to such punishment as the University may determine and impose on him/her.

**Total No. of Printed Pages : 28** *[उपर्युक्त निर्देश हिन्दी में अन्तिम आवरण पृष्ठ पर दिये गए हैं।]*

collegedunia
India's largest Student Review Platform

ROUGH WORK

रफ़ कार्य



collegedunia
India's largest Student Review Platform

# 15P/250/30

**No. of Questions : 150**

**प्रश्नों की संख्या : 150**

***Time : 2 Hours*** | ***Full Marks : 450***

*समय : 2 घण्टे* | *पूर्णाङ्क : 450*

**Note :** (1) Attempt as many questions as you can. Each question carries **3 (Three)** marks. ***One mark will be deducted for each incorrect answer.*** **Zero** mark will be awarded for each unattempted question.

अधिकाधिक प्रश्नों को हल करने का प्रयत्न करें। प्रत्येक प्रश्न **3** (तीन) अंकों का है। ***प्रत्येक गलत उत्तर के लिए एक अंक काटा जायेगा।*** प्रत्येक अनुत्तरित प्रश्न का प्राप्तांक ***शून्य*** होगा।

(2) If more than one alternative answers seem to be approximate to the correct answer, choose the closest one.

यदि एकाधिक वैकल्पिक उत्तर सही उत्तर के निकट प्रतीत हों, तो निकटतम सही उत्तर दें।

**01.** 'शालातुरीय:' इत्यनेन क: बोधित:?

(1) गार्ग्य: (2) गालव: (3) पाणनि: (4) कात्यायन:

**02.** अष्टाध्याय्या: 'पाणिनीयमिताक्षरा' वृत्तिकार आसीत्–

(1) अन्नम्भट्ट: (2) शरणदेव: (3) सृष्टिधर: (4) अप्पन नैनार्य:

**03.** 'सरस्वतीकण्ठाभरणम्' इत्यस्य रचयिताऽऽसीत्–

(1) भोज: (2) शिवस्वामी (3) पतञ्जलि: (4) कात्यायन:



collegedunia
India's largest Student Review Platform

**04.** महाभाष्योपरि 'प्रदीप' टीकाकारोऽभवत्–

(1) चन्द्रगोमी (2) वामनः (3) कैयटः (4) जयादित्यः

**05.** 'रूपमाला' नाम्नीं कृतिं रचितवान्–

(1) विट्ठलाचार्यः (2) विमल–सरस्वती (3) शेषकृष्णः (4) रामचन्द्रः

**06.** भट्टोजिदीक्षितः प्रणिनाय–

(1) शब्दकौस्तुभम् (2) लघुसिद्धान्तकौमुदीम्

(3) मनोरमाकुचमर्दनम् (4) बालमनोरमाम्

**07.** नागेशभट्टो व्यरचत्–

(1) सारसिद्धान्तकौमुदीम् (2) तत्त्वबोधिनीम्

(3) वैयाकरणसिद्धान्तमञ्जूषाम् (4) काशिकाम्

**08.** अष्टाध्यायीग्रन्थे पाणिनिस्मृतवैयाकरणा आसन्–

(1) एकादश (2) अष्टौ (3) दश (4) नव

**09.** व्याडिः प्रणीतवान्–

(1) सङ्ग्रहम् (2) महाभाष्यम् (3) दुर्घटवृत्तिम् (4) प्रक्रियाप्रकाशम्

**10.** 'सिद्धहेमशब्दानुशासनम्' इत्यस्य प्रणेता कः?

(1) क्रमदीश्वरः (2) हेमचन्द्रः (3) अनुभूतिस्वरूपाचार्यः (4) वोपदेवः



collegedunia
India's largest Student Review Platform

**11.** पुरुषोत्तमदेवविरचितो ग्रन्थो वर्तते–

(1) गणरत्नमहोदधिः (2) काशिकावृत्तिः (3) भाषावृत्तिः (4) भागवृत्तिः

**12.** श्रीपतिदत्तरचिता कृतिरस्ति–

(1) कातन्त्रव्याकरणम् (2) कातन्त्रपरिशिष्टम् (3) संक्षिप्तसारः (4) सारस्वतव्याकरणम्

**13.** हेलाराजस्यान्तेवासी प्रसिद्ध आसीत्–

(1) कैयटः (2) पुण्यराजः (3) अभिनवगुप्तः (4) भर्तृहरिः

**14.** वाक्यपदीयस्य 'अम्बाकर्त्री' टीकायाः प्रणेताऽऽसीत्–

(1) रामप्रसादत्रिपाठी (2) भूपनारायणझाः (3) देवस्यरूपमिश्रः (4) रघुनाथ शर्मा

**15.** 'न्यासोद्द्योतः' कस्य रचना?

(1) जगन्नाथस्य (2) मल्लिनाथस्य (3) हरिनाथस्य (4) हरिदीक्षितस्य

**16.** 'बृहच्छब्देन्दुशेखर' ग्रन्थस्य रचयिताऽऽसीत्–

(1) नागेशभट्टः (2) कौण्डभट्टः (3) भट्टोजिदीक्षितः (4) हरिशास्त्री

**17.** 'शब्दरत्नः' कस्य ग्रन्थस्य टीका?

(1) सिद्धान्तकौमुद्याः (2) भूषणसारस्य

(3) प्रौढमनोरमायाः (4) मध्यसिद्धान्तकौमुद्याः



collegedunia India's largest Student Review Platform

**18.** धर्मकीर्त्तेः कृतिरस्ति–

(1) शब्दप्रभा (2) भागवृत्तिः (3) रुपावतारः (4) प्रक्रियाकौमुदी

**19.** 'बृहच्छब्दरत्नः' कस्य कृतिः?

(1) वैद्यनाथस्य (2) जगन्नाथस्य (3) कौण्डभट्टस्य (4) हरिदीक्षितस्य

**20.** लघुशब्देन्दुशेखरस्य वरवर्णिनीटीकाकारः कः?

(1) गुरुप्रसादशास्त्री (2) वैद्यनाथपायगुण्डः (3) शिवरामत्रिपाठी (4) नित्यानन्दपर्वतीयः

**21.** वैद्यनाथपायगुण्डे-विरचिता कृतिरस्ति–

(1) उद्द्योतः (2) छाया (3) प्रदीपः (4) राजलक्ष्मीः

**22.** 'विषमपदी' टीका कस्य ग्रन्थस्य?

(1) महाभाष्यस्य (2) वैयाकरणभूषणस्य

(3) प्रौढमनोरमायाः (4) शब्दकौस्तुभस्य

**23.** 'व्याकरणसिद्धान्तसुधानिधिरि' त्यस्य कर्ता कः?

(1) भीमसेनदीक्षितः (2) नित्यानन्दपर्वतीयः (3) विश्वेश्वसूरिः (4) भानुजिदीक्षितः

**24.** व्याकरणस्याद्यः प्रवक्ता कोऽङ्गीक्रियते?

(1) बृहस्पतिः (2) इन्द्रः (3) चन्द्रः (4) जैनेन्द्रः



collegedunia
India's largest Student Review Platform

**25.** महाभाष्योपरि 'दीपिका' टीकाकारः कः?

(1) हरदत्तः (2) वामनः (3) जयादित्यः (4) भर्तृहरिः

**26.** सारसिद्धान्तकौमुदीकारः कः?

(1) वरदराजः (2) ज्ञानेन्द्रदीक्षितः (3) वासुदेवदीक्षितः (4) रामचन्द्रः

**27.** अष्टाध्याय्याः प्रथमं सूत्रमस्ति

(1) हलन्त्यम् (2) वृद्धिरादैच् (3) भूवादयो धातवः (4) अदेङ् गुणः

**28.** अष्टाध्याय्या अन्तिमं सूत्रमस्ति-

(1) तपरस्तत्कालस्य (2) उरण्रपरः (3) यूनस्तिः (4) अ अ

**29.** परिभाषेन्दुशेखरं प्रणीतवान्–

(1) कैयटः (2) वरदराजः (3) नागेशभट्टः (4) शिवकुमारशास्त्री

**30.** 'पाणिनीयव्याकरणे प्रमाणसमीक्षा' कृतिरस्ति–

(1) मुरलीधरमिश्रस्य (2) मोकाटे श्रीकृष्णस्य

(3) रामप्रसादत्रिपाठिनः (4) रामयत्नशुक्लस्य

**31.** 'मुनित्रयं नमस्कृत्ये' त्यत्र द्वितीयाविभक्तौ किं निमित्तम्?

(1) अकथितञ्च

(2) उपपदविभक्तेः कारकविभक्तेर्बलवत्त्वम्

(3) नमः स्वस्ति-स्वाहा-स्वधाऽलं-वषड्-योगाच्च

(4) अधिशीङ्स्थासां कर्म



collegedunia
India's largest Student Review Platform

**32.** 'लण्' सूत्रे णकारविषयाचार्यप्रवृत्तिर्ज्ञापयती' त्यत्र 'आचार्य' पदेन को गृह्यते?

(1) पाणिनिः (2) कात्यायनः (3) पतञ्जलिः (4) महेश्वरः

**33.** 'ञमङणनम्' इत्यत्र मकारप्रत्याख्याने 'शेखर' कर्तुः क आशयः?

(1) दृष्टफलकप्रत्याख्यानम् (2) अदृष्टफलकप्रत्याख्यानम्

(3) उभयफलकप्रत्याख्यानम्(4) चतुर्दशसूत्राणां महेश्वरकृतत्वप्रत्याख्यानम्

**34.** शेखरे 'अक्षरसमाम्नायस्य न कश्चिदाधुनिकः कर्तास्ती' त्यत्र 'आधुनिक' इत्यस्य कोऽर्थः?

(1) कलियुगी (2) विंशतिशताब्द्यां प्रादुर्भूतः

(3) संस्कारहीनः (4) शरीरी

**35.** 'एतद् विमर्शे शिवसूत्रजालम्' इत्यत्र 'विमर्शे' इतिकीदृशं पदम्?

(1) चतुर्थ्येकवचनम् (2) सप्तम्येकवचनम्

(3) उत्तमपुरुषैकवचने धातुरूपम् (4) प्रथमपुरुषैकवचनम्

**36.** शेखरे 'वेदानां वेदः' इति छन्दोगश्रुतिः किम्परा प्रतिपादिता?

(1) ऋग्वेदपरा (2) महाभारतपरा

(3) माहेश्वर सूत्रक्षाणामनादिश्रुत्यात्मकपरा (4) श्रीमद्भागवतपरा

**37.** ''लण्' सूत्रेऽकारश्चे'' त्यवतरणे नागेशमतमस्ति–

(1) अकारस्यानुनासिकत्वम् (2) अकारस्येत्संज्ञकत्वम्

(3) 'र' प्रत्याहाराङ्गीकरणम् (4) अकारस्याननुनासिकत्वम्



collegedunia
India's largest Student Review Platform

**38.** 'उपदेशेऽजनुनासिक इदि' त्यत्र 'उपदेश' शब्दो नागेशमते कीदृशः?

(1) भावघञन्तः (2) कर्मघञन्तः (3) कर्तृघञन्तः (4) करणघञन्तः

**39.** 'आदिरन्त्येन सहेता' इत्यत्र तृतीया विभक्तिर्वर्तते–

(1) हेत्वर्थे (2) अप्रधानेऽर्थे (3) प्रधानेऽर्थे (4) इत्थम्भूतलक्षणे

**40.** 'प्रकल्प्य चापवादविषयमि' त्यादौ 'प्रकल्प्य' इत्यस्यार्थः नागेशमतेऽस्ति–

(1) सम्पाद्य (2) परित्यज्य (3) विचार्य (4) विचिन्त्य

**41.** 'हलन्त्यमि' ति सूत्रे समापतितोऽन्योन्याश्रयदोषः परिहृतो भट्टोजिदीक्षितेन–

(1) 'हलन्त्यमि' त्यस्यावृत्त्या (2) 'उपदेश इदन्त्यमि' ति सूत्रकरणेन

(3) 'अच्' इति नवीनसूत्रकारणेन (4) 'अनुनासिक' इति पृथक् सूत्रकरणेन

**42.** 'अनुबन्धा एकान्ता' इत्यत्र 'एकान्त' शब्दार्थोऽस्ति–

(1) रहस्यम् (2) अवयवः (3) एकस्य विनाशः (4) एकस्य समीपम्

**43.** 'उपदेश' इत्यस्य 'शास्त्रमि' त्यर्थं को मनुते?

(1) भट्टोजिदीक्षितः (2) कैयटः (3) नागेशः (4) कौण्डभट्टः

**44.** 'उश्च ऊश्च ऊ३श्चे' ति विग्रहे रूपम्भवति–

(1) उवः (2) ऊवः (3) ऊ३वः (4) वः





collegedunia
India's largest Student Review Platform

45. उदात्तादिसञ्ज्ञा कस्य भवति?

(1) हल: (2) अच: (3) अज्झलो: (4) अर्धमात्रिकस्य

46. 'समाहार: स्वरित:' इत्यत्र नागेशमते 'समाहार' शब्दो निष्पन्न:–

(1) ल्युडन्त: (2) सञ्ज्ञायां घञन्त: (3) करणघञन्त: (4) अधिकरणघञन्त:

47. दीर्घस्वरितस्योदाहरणमस्ति–

(1) रथानां येऽरा: (2) क्व वोऽश्वा: (3) शतचक्रं योऽह्य: (4) अग्निम्

48. 'मुखनासिकावचन' इत्यादौ 'वचन' शब्दोऽस्ति–

(1) भावे ल्युडन्त: (2) कर्तरि ल्युडन्त: (3) कर्मणि ल्युडन्त: (4) भावे युच् प्रत्ययान्त:

49. 'तुल्यावास्यप्रयत्नौ यस्ये' त्यत्र षष्ठ्यर्थ: क:?

(1) अवयवत्वम् (2) अवयवित्वम् (3) जन्यत्वम् (4) जनकत्वम्

50. 'तद् + वान्' इत्यत्र दन्तस्थानीय-दकारवकारयो: सवर्णसञ्ज्ञा कथन्न भवति?

(1) उभयो: तवर्गाभावात् (2) उभयो: यण्त्वाभावात्

(3) 'प्रयत्न' शब्दस्य यत्नमात्रग्रहणात् (4) यावदास्यभवतुल्यत्वाभावात्

51. 'तुल्यास्यप्रयत्नम्' इत्यादौ 'प्रयत्न' शब्देन किं गृह्यते?

(1) आभ्यन्तर: (2) बाह्य: (3) मुखम् (4) नासिका



collegedunia
India's largest Student Review Platform

52. जिह्वामूलीयं रुद्धमस्ति–

(1) कवर्गे (2) क-ख-वर्णयोः (3) गकारे (4) घकारे

53. यावदास्यतुल्यत्वाभावात् क-ङयोः कथं सावर्ण्यम्?

(1) कवर्गपाठात्
(2) अल्पप्राणसाम्यात्
(3) नासिकाया आस्यभवत्वात्
(4) नासिकास्थप्रयत्नस्य आस्यबाह्यत्वात्

54. 'अ अ' इत्यष्टाध्यायीस्थसूत्रे सवर्णदीर्घः कथन्न?

(1) उभयोः संवृतत्वात्
(2) प्रथमस्य संवृतत्वात्
(3) प्रयत्नभेदाद्
(4) पररूपेण बाधाद्

55. 'यरलवाश्चाल्पप्राणाः' इत्यत्र चकारेण ग्रहणं भवति–

(1) शलाम् (2) अचाम् (3) हलाम् (4) अयोगवाहानाम्

56. 'यणोऽन्तःस्थाः' इत्यत्र 'अन्तःस्थाः' इति पदे नागेशमते कीदृशः शब्दः?

(1) अकारान्तः (2) आकारान्तः (3) ऐकारान्तः (4) एकारान्तः

57. नागेशमते 'अणुदिदि' त्यादिसूत्रे पठिते 'अप्रत्ययः' इति पदे 'प्रत्यय' शब्दः कीदृशः?

(1) रूढः (2) यौगिकः (3) योगरूढः (4) यौगिकरूढः

58. 'अणुदित्सवर्णस्य चाप्रत्ययः' इति सूत्रपठितस्य 'च' इत्यस्य कुत्रान्वयः?

(1) अणा सह (2) उदिता सह (3) उभाभ्यां सह (4) अप्रत्ययेन सह





collegedunia India's largest Student Review Platform

59. 'अणुदिदि' त्यादिसूत्रस्थेन 'अण्' शब्देन किं गृह्यते?

(1) पर-णकारेण अण्-प्रत्याहार:
(2) अण्-प्रत्यय:
(3) पूर्ण-णकारेण अण्-प्रत्याहार:
(4) 'अ' प्रत्यय:

60. 'तपरस्तत्कालस्ये' ति सूत्रं व्यक्तिपक्षे किमर्थम्?

(1) विध्यर्थम्
(2) नियमार्थम्
(3) उभयार्थम्
(4) अनुभयार्थम्

61. 'वृद्धिरादैजि' त्यत्र विधेयस्य 'वृद्धि' शब्दस्य पूर्वप्रयोग: कथम्?

(1) सञ्ज्ञात्वात्
(2) मङ्गलार्थ:
(3) अल्पाक्षरत्वात्
(4) प्रथमान्तत्वात्

62. 'अणुदित्' इत्यादिसूत्रे नागेशमते 'अण्' ग्रहणं कस्मिन् पक्षे?

(1) जातिपक्षे
(2) व्यक्तिपक्षे
(3) गुणा अभेदका इति पक्षे
(4) 'व्यक्ति: पदार्थो गुणा भेदका' इत्यभिमानपक्षे

63. 'वृद्धिरादैजि' त्यत्र कीदृग्विधस्य 'आदैच्' पदार्थस्य ग्रहणम्?

(1) तद्भावितस्य
(2) अतद्भावितस्य
(3) उभयस्य
(4) अनुभयस्य

64. 'भूवादयो धातव:' इति सूत्रवृत्तौ 'भ्वादय:' इति किमर्थम्?

(1) धातुसञ्ज्ञार्थम्
(2) असत्त्वावधित्वार्थम्
(3) प्राकृतशब्दानां साधुत्वनिरासार्थम्
(4) अदादिगणबोधनार्थम्



collegedunia
India's largest Student Review Platform

**65.** 'गतिश्चे' ति सूत्रे 'च' ग्रहणं किमर्थम्?

(1) प्रकृतिस्वरार्थम्
(2) उपसर्गसञ्ज्ञासमावेशार्थम्
(3) गत्युपसर्गसञ्ज्ञाविधानार्थम्
(4) अग्रिमसूत्रेषूपसर्गसञ्ज्ञानिरासार्थम्

**66.** 'न वेति विभाषे'ति सूत्रे 'नवा' शब्दे कः समासः?

(1) कर्मधारयः
(2) बहुव्रीहिः
(3) अव्ययीभावः
(4) द्वन्द्वसमासः

**67.** 'स्वं रूपं शब्दस्याशब्दसञ्ज्ञे' ति सूत्रे 'अशब्दसञ्ज्ञा' इत्यत्र कः समासः।

(1) बहुव्रीहिः
(2) सप्तमी-तत्पुरुषोत्तर-नञ्समासः
(3) कर्मधारयः
(4) षष्ठीतत्पुरुषोत्तर-नञ्समासः

**68.** 'विरामोऽवसानमि' त्यत्र नागेशमते 'विराम' शब्दार्थः कः?

(1) वर्णानामभावः
(2) वर्णोच्चारणाभावः
(3) उभयाभावः
(4) संहिताया अभावः

**69.** 'सुप्तिङन्तं पदमि' ति सूत्रेण परिभाषा ज्ञाप्यते–

(1) येन विधिस्तदन्तस्य
(2) प्रत्ययग्रहणे तदन्तग्रहण्
(3) यस्मात्प्रत्ययविधिस्तदादेस्तदन्तस्य ग्रहणम्
(4) सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति

**70.** 'हलोऽनन्तराः संयोगः' इत्यत्र 'हलः' इत्यनेन किं विवक्षितम्?

(1) प्रत्येकव्यञ्जनवर्णः
(2) व्यञ्जनानां बहुत्वम्
(3) हलौ च हलश्चेत्येकशेषत्वम्
(4) व्यञ्जनद्वयम्



P.T.O.

collegedunia
India's largest Student Review Platform

71. 'इति सञ्ज्ञाप्रकरणमि' त्यनेन शेखरे किं बोधितम्?

(1) समस्तसञ्ज्ञानां समाप्तित्वम्

(2) प्रथमाध्यायस्थानां सन्धिकार्योपयोगिनीनां सञ्ज्ञानां प्रकरणं समाप्तम्

(3) प्रथमाध्यायस्थमस्तसञ्ज्ञानां बोधकत्वम्

(4) उपलक्षणार्थम्

72. 'इको गुणवृद्धी' त्यत्र 'इक:' इति पदं वर्तते–

(1) षष्ठ्यन्तम् (2) प्रथमैकवचनान्तम् (3) पञ्चम्यन्तम् (4) द्वितीयाबहुवचनम्

73. 'इको गुणवृद्धी' ति सूत्रं किम्प्रकारकम्?

(1) सञ्ज्ञासूत्रम् (2) परिभाषासूत्रम् (3) अधिकारसूत्रम् (4) नियमसूत्रम्

74. 'मिदचोऽन्त्यादि' त्यादौ 'अच:' इत्यत्र का विभक्ति:?

(1) षष्ठ्येकवचनम् (2) पञ्चम्येकवचनम् (3) प्रथमाबहुवचनम् (4) द्वितीयाबहुवचनम्

75. 'षष्ठी स्थानेयोगा' इति सूत्रस्थ 'स्थानेयोगा' इत्यत्र प्रौढमनोरमाकृदभिमतो विग्रहोऽस्ति–

(1) स्थाने योगोऽस्या:
(2) स्थानेन योगोऽस्या:
(3) स्थानस्य योगोऽस्या:
(4) स्थानाय योगोऽस्या:

76. 'चेता' इत्यत्र ए' गुण: केन आन्तर्येण भवति?

(1) स्थानकृतेन (2) अर्थकृतेन (3) गुणकृतेन (4) प्रमाणकृतेन



collegedunia
India's largest Student Review Platform

**77.** 'तस्मिन्निति निर्दिष्टे' इत्यादौ 'तस्मिन्' इति केषामनुकरणम्?

(1) सति सप्तम्यन्तानुकरणम्
(2) वैषयिकाधिकरणसप्तम्यन्तानाम्
(3) औपश्लेषिकाधिकरणसप्तम्यन्तानाम्
(4) अभिव्यापकाधिकरण सप्तम्यन्तानाम्

**78.** 'अनेकाल् शित् सर्वस्ये' त्यनेन 'आदेः परस्ये' ति सूत्रं परत्वाद् बाध्यते–

(1) 'अतो भिस ऐस्' इत्यत्र
(2) 'जश्शसोः शि' इत्यत्र
(3) 'इदम इश्' इत्यत्र
(4) 'ज्यायादीयसः' इत्यत्र

**79.** 'तुदति' इत्यत्र लघूपधगुणं बाधित्वा 'श' प्रत्ययो भवति–

(1) परान्नित्यस्य बलवत्त्वाद्
(2) नित्यादन्तरङ्गस्य बलवत्त्वाद्
(3) अन्तरङ्गापवादस्य बलवत्त्वाद्
(4) परापवादस्य बलवत्त्वाद्

**80.** 'इको यणची' त्यत्र 'इक्' शब्देन प्रौढमनोरमानुसारं कति संख्या गृह्यते?

(1) चत्वारः (2) अष्टौ (3) दश (4) षट्ष्टिः

**81.** 'अनचि चे' ति सूत्रव्याख्यावसरे मनोरमाकृता कस्य सूत्रस्यानारम्भणं कृतम्–

(1) नाज्झलौ (2) सर्वत्र शाकल्यस्य (3) शरोऽचि (4) अचो रहाभ्यां द्वे

**82.** 'स्थानिवदि' त्यादिसूत्रेण अला विधौ स्थानिवद्भावनिषेधस्योदाहरणमस्ति–

(1) द्यौः (2) द्युकामः (3) व्यूढोरस्केन (4) क इष्टः





collegedunia
India's largest Student Review Platform

**83.** 'अचः परस्मिन् पूर्वविधावि' त्यत्र दीक्षितमते पूर्वत्वस्यावधिः कः?

(1) स्थानी (2) आदेशः (3) निमित्तम् (4) स्थानिभूतोऽच्

**84.** 'न पदान्तस्ये' ति सूत्रस्य पदान्तविधौ स्थानिवद्भावनिषेधोदाहरणमस्ति–

(1) सुद्ध्युपास्यः (2) यातिः (3) कौस्तः (4) चिकीर्षकः

**85.** 'संयोगान्तस्ये' त्यत्र 'संयोगौ अन्तौ यस्ये' ति विग्रहः कस्य मते?

(1) बालमनोरमाकृतः (2) शब्दरत्नकृतः (3) शेखरकृतः (4) मनोरमाकृतः

**86.** 'सुद्ध्युपास्यः' इत्यत्र यकारस्य द्वित्वविधायकं शास्त्रमस्ति–

(1) अनचि च

(2) अचो रहाभ्यां द्वे

(3) यणो मयो द्वे वाच्यः

(4) त्रिप्रभृतिषु शाकटायनस्य

**87.** 'माहात्म्यम्' इत्यत्र 'हलो यमां यमी' त्यनेन मलोपः कथन्न भवति?

(1) हलः परस्य यमोऽभावात्

(2) यमो यम्परत्वाभावात्

(3) यथासंख्यविज्ञानात्

(4) यम्प्रत्याहारे मकारस्याभावात्

**88.** 'वान्तो यि प्रत्यये' इत्यत्र 'वान्त' शब्देन गृह्यते–

(1) अव् (2) आव् (3) 'अव् आव्' इत्येतौ (4) अवङ्

**89.** 'विश्वपा' शब्दस्य षष्ठीबहुवचने रूपमस्ति–

(1) विश्वपाम् (2) विश्वपानाम् (3) विश्वपेषाम् (4) विश्वपासाम्

**90.** 'धातोस्तन्निमित्तस्यैवे' ति सूत्रं किम्प्रकारकम्?

(1) विधिसूत्रम् (2) नियमसूत्रम् (3) सञ्ज्ञासूत्रम् (4) परिभाषासूत्रम्

**91.** 'उरण् रपरः' इत्यत्र 'रपरः' इत्यनेन ग्रहणं भवति–

(1) 'र् अ' वर्णयोः (2) 'ऋ अ' वर्णयोः (3) 'र् ल्' वर्णयोः (4) 'लृ अ' वर्णयोः

**92.** 'कृष्णर् द्धिः' इत्यत्र सति द्वित्वे लोपे चासति रूपम्भवति–

(1) कृष्णद्र्द्धिः (2) कृष्णर्धिः (3) कृष्णर्द्धिः (4) कृष्णर्धिर्धः

**93.** 'अव + आङ् + इहि' इत्यत्र रूपं सेत्स्यति–

(1) अव एहि (2) अवैहि (3) अवेहि (4) अवा इहि

**94.** 'अक्षौहिणी = सेना' इत्यत्र णत्वविधायकं शास्त्रमस्ति–

(1) रषाभ्यां नो णः समानपदे (2) अट् कुप्वाङ्नुम्व्यवायेऽपि

(3) पूर्वपदात्सञ्ज्ञायामगः (4) एकाजुत्तरपदे णः

**95.** 'प्रादूहोढोढ्येषैष्येषु' इत्यत्र 'प्रैष्य' इत्युदाहरणे कस्य ग्रहणम्?

(1) अव्ययस्य (2) अनव्ययस्य (3) उभयोः (4) नोभयोः

**96.** 'प्रवत्सतरे' त्यादिवार्त्तिकव्याख्यायां मनोरमाग्रन्थे 'वत्सतरार्णमि' त्युदाहरणं के उदाहरन्ति?

(1) भाष्यानुयायिनः (2) कालापानुसारिणः (3) वृत्तिग्रन्थानुसारिणः (4) कैयटानुसारिणः





collegedunia
India's largest Student Review Platform

**97.** 'अन्तादिवच्चे' ति सूत्रं प्रौढमनोरमाग्रन्थे केन सूत्रेण गतार्थम्?

(1) अचः परस्मिन् पूर्वविधौ

(2) स्थानिवदादेशोऽनल्विधौ

(3) न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर् विधिषु

(4) द्विर्वचनेऽचि

**98.** 'प्रेजते' इति रूपं कस्य धातोः?

(1) 'एजृ दीप्तौ' धातोः (2) 'एजृ कम्पने' धातोः

(3) उभयोः (4) नोभयोः

**99.** 'हलस्य ईशा' इति विग्रहे रूपम्भवति–

(1) हलीशा (2) हलेशा (3) उभे (4) नोभे

**100.** 'स्तोः श्चुना श्चुः' इति सूत्रे 'स्तोः' इत्यत्र कः समासः?

(1) इतरेतरयोगद्वन्द्वः (2) समाहारद्वन्द्वः (3) बहुव्रीहिः (4) तत्पुरुषः

**101.** 'तच्छिवः' इत्यत्र दीक्षितमते प्रारम्भिकः सन्धि–विच्छेदः कीदृशः?

(1) तत् शिवः (2) तद् शिवः (3) तज् शिवः (4) तच् शिवः

**102.** 'ङमो ह्रस्वादचि ङमुण्नित्यम्' इत्यत्र 'नित्य' ग्रहणं किमर्थम्?

(1) विकल्पाभावार्थम् (2) विस्पष्टार्थम्

(3) विभाषाद्वयमध्ये पाठाभावार्थम् (4) अनित्यत्वनिवृत्त्यर्थम्



collegedunia
India's largest Student Review Platform

103. 'कान् + कान् = काँस्कान्' इत्यत्र पृथक् पृथक् प्रयुक्तस्य 'किम्' शब्दस्य कोऽर्थः?

(1) प्रश्नः (2) क्षेपः

(3) उभयत्र प्रश्नः (4) एकस्य 'किम्' शब्दस्य प्रश्नः, द्वितीयस्य क्षेपः

104. 'मणीवोष्ट्रस्य' इत्यादौ सन्धिविच्छेदः कः?

(1) मणि इव उष्ट्रस्य (2) मणी इव उष्ट्रस्य (3) मणी व उष्ट्रस्य (4) मणि वा उष्ट्रस्य

105. 'पुरः प्रवेष्टव्या' इत्यत्र 'पुरः' इत्यस्ति-

(1) अव्ययम् (2) अनव्ययम्

(3) अकारान्तो पुर शब्दः (4) आकारान्तो पुरा शब्दः

106. 'मातुः कार्यमि' त्यत्र 'इदुदुपधस्ये' त्यादिना विसर्गस्य षत्वं कथं न?

(1) अप्रत्ययस्येति निषेधात्

(2) उदुपधस्याभावात्

(3) अप्रत्ययावयवस्याभावात्

(4) 'भ्रातुष्पुत्र' शब्दस्य कस्कादिषु पाठेन ज्ञापनविशेषात्

107. 'द्विस्त्रिश्चतुरिति कृत्वोऽर्थे' इति सूत्रे 'चतुः' शब्दः कीदृशो गृह्यते?

(1) अकारान्तश्चतुर-शब्दः (2) रेफान्तश्चतुर् शब्दः

(3) सुजन्त एव चतुःशब्दः (4) ऋकारान्तश्चतृ शब्दः



collegedunia India's largest Student Review Platform

108. 'परमसजूर्ध्यामि' त्यादौ 'सजुष्' शब्दस्य रुत्वं कथम्?

(1) 'व्यपदेशिवद्भावोऽप्रातिपदिकेन' इति परिभाषया

(2) 'व्यपदेशिवदेकस्मिन्' इति तदन्तविधिना

(3) 'ग्रहणवता प्रातिपदिकेन तदन्तविधिर्न' इतिपरिभाषया

(4) 'येन विधिस्तदन्तस्ये' ति परिभाषया

109. 'भो-भगो-अधो-अ-पूर्वस्ये' ति सूत्रे पूर्वरूपसन्धिः कथम्?

(1) 'ओत्' इत्यनेन प्रगृह्यसञ्ज्ञात्वात्

(2) 'प्लुत-प्रगृह्याऽचि नित्यम्' इति प्रकृतिभावत्वात्

(3) सौत्रत्वात्

(4) पदान्तत्वाभावात्

110. 'सोऽचि लोपे चेद् पादपूरणमि' इति सूत्रोदाहरणं 'सास्मा अरम्' इति किमर्थं दत्तं प्रौढमनोरमायाम्?

(1) 'बहुल' ग्रहणानुवृत्तिप्रदर्शनार्थम्

(2) सूत्रस्य व्यर्थतापादानार्थम्

(3) वैदिकोदाहरणप्रदर्शनार्थम्

(4) 'सोस्मा अरमि' त्यस्याशुद्धिबोधनार्थम्

111. 'शब्दानुशासनम्' इत्यत्र कः समासः?

(1) षष्ठीतत्पुरुषः (2) बहुव्रीहिः (3) तृतीयातत्पुरुषः (4) कर्मधारयः

112. 'स्फोट' रूप शब्दस्य लक्षणमस्ति-

(1) प्रतीतपदार्थको लोके ध्वनिरिति स शब्दः

(2) आकाशदेशः शब्दः

(3) श्रोत्रग्राह्यो गुणः शब्दः

(4) येनोच्चारितेन सास्ना-लाङ्गूल-ककुद-खुर-विषाणिनां सम्प्रत्ययो भवति स शब्दः



collegedunia
India's largest Student Review Platform

113. 'लोपागमवर्णविकारज्ञो हि सम्यग् वेदान् पालयिष्यती' त्यनेन शब्दानुशासनस्य किम्भूतं प्रयोजनं प्रतिपादितम्?

(1) रक्षा (2) आगम: (3) ऊह: (4) असन्देह:

114. 'चत्वारि श्रृङ्गा त्रयो अस्य पादा' इत्यनेन त्रय: पादा: के सङ्केतिता:?

(1) ऋग्यजु:सामानि (2) भूतभविष्यद्वर्तमाना:

(3) पश्यन्तीमध्यमावैखर्य: (4) उर: शिर: कण्ठा:

115. 'सक्तुमिव तितउना' इत्यत्र 'तितउ' इत्यस्य कोऽर्थ:?

(1) शूर्पम् (2) परिपवनम् (3) खट्वा (4) आसन्दिका

116. 'अनुक्षरन्ति काकुदम्' इत्यक्ष 'काकुदमि' त्यस्य कोऽर्थ:?

(1) जिह्वा (2) कण्ठ: (3) मूर्द्धा (4) तालु

117. शब्दानुशासनार्थं कस्योपदेश: कर्तव्य?

(1) शब्दोपदेश: (2) अपशब्दोपदेश: (3) उभयोरुपदेश: (4) धर्मोपदेश:

118. शब्दपारायणं क: प्रोवाच?

(1) इन्द्र: (2) बृहस्पति: (3) भरद्वाज: (4) चन्द्र:

119. उत्सर्गशास्त्रम् किमस्ति?

(1) आतोऽनुपसर्गे क: (2) कर्मण्यण् (3) सुपिस्थ: (4) समिख्य:





collegedunia
India's largest Student Review Platform

**120.** विद्या कतिभि: प्रकारैरुपयुक्ता भवति?

(1) त्रिभि: (2) पञ्चभि: (3) चतुर्भि (4) षड्भि:

**121.** वैयाकरणसिद्धान्ते क: पदार्थ:?

(1) जाति: (2) व्यक्ति: (3) गुण: (4) जातिर्व्यक्तिश्च

**122.** 'शब्दो नित्योऽनित्यो 'वे' ति प्राधान्येन कस्मिन् ग्रन्थे विचारित:?

(1) काशिकायाम् (2) अष्टाध्याय्याम् (3) सङ्ग्रहे (4) वाक्यपदीये

**123.** 'सिद्ध' शब्द: कथं नित्यस्य वाचक:?

(1) कोशेन (2) लोकव्यवहारेण

(3) 'व्याख्यानतो विशेषप्रतिपत्तिरि' ति परिभाषया (4) शास्त्रप्रामाण्येन

**124.** 'सिद्धे शब्दे अर्थे सम्बन्धे चे'ति विग्रह: कं मत्वा क्रियते?

(1) अनित्यपदार्थं मत्वा (2) नित्यपदार्थं मत्वा

(3) द्रव्यपदार्थं मत्वा (4) जातिपदार्थं मत्वा

**125.** कतिविधा अनित्यता भवति?

(1) चतुर्विधा (2) द्विविधा (3) त्रिविधा (4) पञ्चविधा

**126.** 'ध्रुवं कूटस्थमि' त्यनेन कीदृशी अनित्यता परिहृता भवति?

(1) परिणामानित्यता (2) संसर्गानित्यता (3) प्रध्वंसानित्यता (4) प्रवाहानित्यता



collegedunia
India's largest Student Review Platform

**127.** 'सिद्धः शब्दोऽर्थः सम्बन्धश्चे'ति कथं विज्ञायते?

(1) शास्त्रतः (2) कोशतः (3) लोकतः (4) आप्तवाक्यतः

**128.** शब्दविषये यद्यन्यत् प्रमाणं तर्हि शास्त्रेण किं क्रियते?

(1) शिष्यानुशासनम् (2) संस्कारापादनम् (3) व्यक्तित्वनिर्माणम् (4) धर्मनियमः

**129.** शब्दः धर्मप्रयोजकः कदा भवति?

(1) ज्ञानेन (2) श्रवणेन (3) ज्ञानप्रयोगाभ्याम् (4) मननेन

**130.** वैयाकरणाः प्रामुख्येन किम्प्रमाणकाः?

(1) प्रत्यक्षप्रमाणकाः (2) अनुमानप्रमाणकाः (3) उपमानप्रमाणकाः (4) शब्दप्रमाणकाः

**131.** 'व्याकरणमि' त्यत्र कः पदार्थः?

(1) शब्दः (2) सूत्रम् (3) वार्तिकम् (4) लक्ष्यलक्षणे

**132.** 'वर्णोपदेशः' किमर्थः?

(1) वर्णज्ञानार्थः (2) पदज्ञानार्थः (3) वाक्यज्ञानार्थः (4) वृत्तिसमवायार्थः

**133.** अकारस्य विवृतोपदेशः किमर्थः?

(1) संवृतनिवृत्त्यर्थः (2) कालभेदनिवारणार्थः

(3) आकारग्रहणार्थः (4) क्रियातिरिक्तकालबोधनार्थः



collegedunia
India's largest Student Review Platform

**134.** शब्दानां प्रवृत्तिः कतिविधा?

(1) पञ्चविधा (2) षड्विधा (3) द्वितयी (4) चतुष्टयी

**135.** वर्णग्रहणेन के गृह्यन्ते?

(1) पदानि (2) शब्दाः (3) वाक्यानि (4) वर्णैकदेशाः

**136.** वर्णसमाम्नाये हकारस्य पूर्वोपदेशः किमर्थः?

(1) 'अर्हेण' इति सिद्ध्यर्थम्
(2) 'अधुक्षदि' त्यर्थम्
(3) 'रुदिही' त्यर्थम्
(4) 'अदाग्धामि' त्यर्थम्

**137.** अयोगवाहोऽस्ति–

(1) अ (2) क् (3) श् (4) विसर्जनीयः

**138.** अयोगवाहानां पाठः कर्तव्यः–

(1) झल्सु (2) एक्षु (3) अक्षु (4) अट्सु शर्षु च

**139.** 'वर्णा अर्थवन्त' इत्यस्योदाहरणम्–

(1) 'इङ्' धातुः (2) सिंहः (3) हतः (4) लविता

**140.** अनुबन्धानां प्रत्याहारेषु ग्रहणं नास्तीत्यत्र ज्ञापकमस्ति-

(1) इको यणचि
(2) एचोऽयवायावः
(3) तृषि-मृषिकृषेः काश्यपस्य
(4) आद्गुणः



collegedunia
India's largest Student Review Platform

**141.** अन्त:स्थानां कुत्रोपदेश आवश्यक:?

(1) शल्सु (2) शर्षु (3) अक्षु (4) अण्सु

**142.** 'झरो झरि सवर्णे' इति सूत्रस्य लक्ष्यमस्ति–

(1) आदित्य: (2) प्रत्तम् (3) चतुर्षु (4) कर्षति

**143.** 'केऽण:' इति सूत्रे 'अण्' प्रत्याहारान्तर्गतवर्णोऽस्ति–

(1) ल् (2) ह् (3) ए (4) उ

**144.** भट्टोजिदीक्षितमते 'एत्येधत्यूठ्सु' इति सूत्रे अनुवृत्तम् 'एची'ति पदं कस्य विशेषणम्?

(1) 'एती' त्यस्य (2) एत्येधत्यो: (3) एधतेरेव (4) ऊठ:

**145.** 'उप + ओषति' इत्यत्र सन्धौ किं प्रवर्तते?

(1) पररूपम् (2) वृद्धि: (3) पूर्वरूपम (4) गुण:

**146.** उपसर्गा: कति भवन्ति?

(1) दश (2) पञ्चदश (3) विंशति: (4) द्वाविंशति:

**147.** 'विभाषा' सञ्ज्ञा कस्य भवति?

(1) प्रसज्यप्रतिषेधस्य (2) नवयो: (3) निषेधविकल्पयो: (4) पर्युदासप्रतिषेधस्य



collegedunia
India's largest Student Review Platform

**148.** 'पर: सन्निकर्ष: संहिता' इत्यत्र 'सन्निकर्ष' पदार्थ: क:?

(1) सन्निधि: (2) सम्बन्ध: (3) संयोग: (4) समवाय:

**149.** 'विवरणकार:' क: प्रथित:?

(1) पाणिनि: (2) कात्यायन: (3) पतञ्जलि: (4) भर्तृहरि:

**150.** व्याकरणाध्ययनस्य गौणप्रयोजनानि कति?

(1) पञ्च (2) त्रयोदश (3) त्रीणि (4) पञ्चदश



200

collegedunia
India's largest Student Review Platform

ROUGH WORK
रफ़ कार्य



collegedunia
India's largest Student Review Platform

# अभ्यर्थियों के लिए निर्देश

*(इस पुस्तिका के प्रथम आवरण पृष्ठ पर तथा उत्तर-पत्र के दोनों पृष्ठों पर केवल नीली-काली बाल-प्वाइंट पेन से ही लिखें)*

1. प्रश्न पुस्तिका मिलने के 10 मिनट के अन्दर ही देख लें कि प्रश्नपत्र में सभी पृष्ठ मौजूद हैं और कोई प्रश्न छूटा नहीं है। पुस्तिका दोषयुक्त पाये जाने पर इसकी सूचना तत्काल कक्ष-निरीक्षक को देकर सम्पूर्ण प्रश्नपत्र की दूसरी पुस्तिका प्राप्त कर लें।
2. परीक्षा भवन में ***लिफाफा रहित प्रवेश-पत्र के अतिरिक्त,*** लिखा या सादा कोई भी खुला कागज साथ में न लायें।
3. ***उत्तर-पत्र अलग से दिया गया है। इसे न तो मोड़ें और न ही विकृत करें। दूसरा उत्तर-पत्र नहीं दिया जायेगा। केवल उत्तर-पत्र का ही मूल्यांकन किया जायेगा।***
4. अपना अनुक्रमांक तथा उत्तर-पत्र का क्रमांक प्रथम आवरण-पृष्ठ पर पेन से निर्धारित स्थान पर लिखें।
5. ***उत्तर-पत्र के प्रथम पृष्ठ पर पेन से अपना अनुक्रमांक निर्धारित स्थान पर लिखें तथा नीचे दिये वृत्तों को गाढ़ा कर दें। जहाँ-जहाँ आवश्यक हो वहाँ प्रश्न-पुस्तिका का क्रमांक तथा सेट का नम्बर उचित स्थानों पर लिखें।***
6. ***ओ० एम० आर० पत्र पर अनुक्रमांक संख्या, प्रश्नपुस्तिका संख्या व सेट संख्या (यदि कोई हो) तथा प्रश्नपुस्तिका पर अनुक्रमांक और ओ० एम० आर० पत्र संख्या की प्रविष्टियों में उपरिलेखन की अनुमति नहीं है।***
7. ***उपर्युक्त प्रविष्टियों में कोई भी परिवर्तन कक्ष निरीक्षक द्वारा प्रमाणित होना चाहिये अन्यथा यह एक अनुचित साधन का प्रयोग माना जायेगा।***
8. ***प्रश्न-पुस्तिका में प्रत्येक प्रश्न के चार वैकल्पिक उत्तर दिये गये हैं। प्रत्येक प्रश्न के वैकल्पिक उत्तर के लिए आपको उत्तर-पत्र की सम्बन्धित पंक्ति के सामने दिये गये वृत्त को उत्तर-पत्र के प्रथम पृष्ठ पर दिये गये निर्देशों के अनुसार पेन से गाढ़ा करना है।***
9. प्रत्येक प्रश्न के उत्तर के लिए केवल एक ही वृत्त को गाढ़ा करें। एक से अधिक वृत्तों को गाढ़ा करने पर अथवा एक वृत्त को अपूर्ण भरने पर वह उत्तर गलत माना जायेगा।
10. ***ध्यान दें कि एक बार स्याही द्वारा अंकित उत्तर बदला नहीं जा सकता है। यदि आप किसी प्रश्न का उत्तर नहीं देना चाहते हैं, तो संबंधित पंक्ति के सामने दिये गये सभी वृत्तों को खाली छोड़ दें। ऐसे प्रश्नों पर शून्य अंक दिये जायेंगे।***
11. रफ कार्य के लिए प्रश्न-पुस्तिका के मुखपृष्ठ के अंदर वाला पृष्ठ तथा उत्तर-पुस्तिका के अंतिम पृष्ठ का प्रयोग करें।
12. परीक्षा के उपरान्त केवल ***ओ एम आर उत्तर-पत्र*** परीक्षा भवन में जमा कर दें।
13. परीक्षा समाप्त होने से पहले परीक्षा भवन से बाहर जाने की अनुमति नहीं होगी।
14. यदि कोई अभ्यर्थी परीक्षा में अनुचित साधनों का प्रयोग करता है, तो वह विश्वविद्यालय द्वारा निर्धारित दंड का/की, भागी होगा/होगी।

collegedunia
India's largest Student Review Platform